RASAHRDAYATANTRAM

		Page
1.	Introduction	S3
2.	Text in Sanskrit Chapters I-X*	S12
3.	Transliteration	S47
4.	English Version	S48

*The remaining 11 chapters of *Rasahṛdayatantram* alongwith Appendices, Glossary and Bibliography will be included in the IJHS (32(2) June Issue.

Introduction

One of the fascinating facets of human obsession has been its constant endeavour to conquer death and to live in a state of perpetual youth. In ancient times, this human inclination was inexorably concerned, apart from the effervescent bodily health and a sound mind, with the preparation of what came to be known as *Elixir of Life*, for attaining a near or total immortality-a goal ever in sight but never reached. While the goal was practically the same in many an ancient culture-area, the pathways and formulations were somewhat different from one area to another.

In India, The Āyurveda (at least about 2500 years old), which, in essence, means a total knowledge of the life-sustaining processes, conceived of its own ideas and practices towards this end in the holistic matrix of *deha-mānasa* or psycho-somatic concepts. It is interesting to note that, when the ancient multifarious medical practices and the associated ideas which had held their ground in India for many centuries, began to be systematised perhaps around 600 BC resulting in the emergence of the Āyurveda now familiar to us, the latter had eight major divisions; of them two were concerned with rejuvenation (rasāyana) and virilification (vājīkaraṇa) treatments.

Early ideas on Rejuvenation

In the *Ṛgveda*, there are references to *Soma rasa*, an exhilarating elixir which was regarded even as a drink of immortal gods. The Āyurvedic classics, the *Caraka* and *Suśruta Saṃhitās*, have given due importance to the maintance of the vitality of the body, increased powers of mind and a charming personality. For this purpose, several treatments and in-take of specially prepared formulations have been delineated in these treatises. The *Suśruta* mentions a *rasāyana* capable of making a human body possess an almost life-long youth and extraordinary mental faculties. The composition *(Śatapāka vacaghṛta)*, according to this text, could make one live for five hundred years! The Soma elixir was supposed to enable one to live 10,000 years with a youthful body and all the enjoyments associated with it, besides certain superhuman qualities. Essentially these *rasāyanas* are herbal, although some times gold is used along with other substances of vegetable origin.

The Caraka Saṃhitā also describes certain processes and recipes for giving unrivalled strength to the body and a longevity of even a thousand years!

The text also present certain methods and preparations by means of which

a longevity of 10,000 years would be possible.

Unfortunately, however, both the Āyurvedic treatises affirmed that the rejuvenation and virilification were meant only for the privileged upper castes or the select segments of the people, which did not after all, constitute the struggling populace of the times. But the innate desire to live long in perpetual youth and to have an exalted experience in this very life is common to all. Such human attitudes endeavour to bypass the privileged caste structures, and to evolve new modes of thought and practices conducive to their realization. In India, the *Tantrik* system, with its own concepts and methods, offered an extraordinary social mileu admitting into its fold any one irrespective of caste, creed or sex. This system, in which both the Buddhists and the Hindus were involved, drew its sustenance from a powerful male-female symbolism.

Tantrism and Alchemy

The tantrik *siddhi* or the highest attainment, was formulated in terms of several pathways, one of which was through mineral elixirs in contradistinction to the herbal ones of the Āyurveda. While the theoretical basis of the Āyurveda was the doctrine of five-elements *(prithvī, ap, tejas, vāyu and ākaśa)*, the tantric practices had no such physical basis; instead they were intertwined with the supposed divine or sublime union of the male and the female in an esoteric manner. In this respect, mercury (male) and sulphur (female) as well as mica and other minerals assumed great importance and entered the tantrik pathway of formulating mineral elixirs. Of them, mercuric sulphide or cinnabar, became the prime representative of the male-female divine union for the attainment of the so called material immortality.

At this stage, it is desirable, indeed necessary, to reflect briefly on that esoteric garment of the history of chemistry called ALCHEMY. A primitive chemistry, alchemy had its twin goals, namely, the transmutation of base metals ultimately into gold, and the preparation of the elixir of immortal life. With the emergence of modern chemistry as a science towards the end of the eighteenth century AD the alchemical thoughts and practices went into oblivion; but from the early centuries of the Christian era to the end of the eighteenth century-for almost 1600 years-it held sway over human mind both in the East and in the West.

China is regarded as the original home of alchemy which was integrated with the Taoistic *Yin-Yang*, the female and the male symbolic prime elements. Chinese alchemy, centering round cinnabar or mercuric sulphide and its constituents

(mercury and sulphur) in terms of female-male imagery, could be traced at least to 2nd cent AD to the text, *Can-tong-qi* or Wei Bo-Yang. The presumed ideal union of *Yin* and *Yang*, i.e., cinnabar was supposed to posses miraculous powers for conferring material immortality.

Chinese alchemy was in its peak from probably between the fourth and the seventh centuries AD with fully developed processes and preparations concerning the longevity and transmutation of base metals into gold, in which some plants were also being used. Historically, the cultural intercourse between India and China was notable between the third and seventh centuries AD There were wandering ministrels to and from China. The Indian tantrism during its diversified growth was prone to absorb some Chinese concepts and practices, specially of alchemy, as a result of this intercourse. There are tantrik texts like the *Yāmala*, which speak of Mahācīna as a place to be visited for attaining *mahāsiddhi*. The Buddhist alchemist, Nāgārjuna, is stated to have gone to Mahācīna. Nīla Sarasvatī, a tantrik goddess is stated to be Chinese in origin, while another goddess, Tārā is believed to have emanated from the country of Bhoṭa, now comprising Tibet. (for details, see Chakravarti, C., p 46; chaps : 6-8; Bagchi, pp. 2 ff).

There is yet another aspect relating to alchemical practices in south India, specially in Tamilnadu. One Bogar, a Tamil Siddha, who wrote works in Tamil on alchemy is stated to have Chinese connections and there are some words associated with the name of China in the Tamil alchemical texts.

It would, thus, seem that the seed-ideas of alchemy, namely, the importance of mercury and sulphur for material immortality, as well as certain esoteric practices and mineral-herbal formulations, might have found a congenial home in India by about the 5th-6th cent AD, specially in the tantrik mileu. In course of time, these ideas and practices were Indianised. No wonder, then, that mercury became the creative principle of Śiva, and Sulphur that of Pārvatī while the *rasaliṅga* (mercuric sulphide or perhaps gold amalgam) was venerated as the divine idol by the *rasavādins*. In any case, the Āyurvedic texts before the 7th cent AD do not at all speak about the internal use of the compounds of mercury, sulphur, mica etc for attaining material immortality although in the *Caraka Saṃhitā*, there are references to *loharasāyana, maṇḍura, manaśīlā, śilājatu* etc., Further, as stated before, the theoretical frame-work of the Āyurveda is totally different from the esoteric male-female symbolism of the Indian alchemical texts.

The Rasaśāstra Literature

The literature on India alchemy is, broadly, in two main languages-Sanskrit and Tamil. The general approach of the texts are, more or less, the same while their contents and the categorization of substances sometimes vary. Their dates are not certain. But, possibly, some texts which are a part of the tantrik texts may be earlier than those which came to be designated later as the *rasaśāstra* texts. The most notable among the latter are : *Rasaratnākara* of Siddha Nāgārjuna; *Rasārṇava* (author unknown); *Rasendracūḍāmaṇi* or Somadeva; *Rasaratnasamuccaya* of Vāgbhaṭa; *Rasaprakāśa Sudhākara* of Yaśodhara; *Rasaratnākara* of Nityanātha; *Rasarājalakshmī* of Rāmeswara Bhaṭṭ; *Rasendracintāmaṇi* of Rāmachandra Guha; *Rasasāra* of Govindācārya; *Rasakaumudī* of Jñāna Chandra; *Rasasaṅketakalikā* of Cāmuṇḍa; *Rasapaddhati* of Bindu Paṇḍita; *Rasāmṛta* of Rāmeśvara; *Rasendrasārasaṃ graha* of Gopāla Krishna, *Pāradayoga* of Śivarāma Yogin etc. There are many other texts which deal with specific aspects like sulphur, metals and minerals in the alchemical context. Likewise, there are several texts in Tamil attributed to Agastya, Bogar, Rāmadevar, Konganavar, Nandīśvar; Kailāsa muni, Maccai muni, Süryanandar etc. who were among the 18 Siddhas. In the Sanskrit tradition 84 Siddhas have been named (*Bhasma Vijñān* by Harisharananand Vaidya, Amritsar, 1954, pp.66-67), starting on the *rasaśāstra.* All of these texts, both in Sanskrit and Tamil, might belong to a period between the eighth and the seventeeth centuries AD No systematic attempt seems to have been made so far to fix the possible date of each text, with some exceptions.

The mercurial lore and the early alchemical ideas were a part of certain tantrik compilations. For example, the *Mātṛkābhedatantram* and the *Rasārṇavakalpa* are found amidst the tantrik composite called the *Rudrayāmala* in Sanskrit. The *Rasārṇavakalpa* (Mira Roy and Subbarayappa; pp 2-4) describes various tantric practices and presents the alchemical ideas and practices in terms of what are known as the *Kalpas*, specially those of certain plants. Of the 29 *Kalpas* of this text, 21 are devoted to the plants, two are concerned with sulphur and arsenic sulphide and six deal with certain efficacious soil and water.

The Rasahṛdayatantram

The *Rasahṛdayatantram* is another text which is associated with what is referred to as the *Kāpālikatantra,* as evidence by the manuscript compendium of the Oriental Research Institute Mysore (No. 3005/2; Serial Number 42370; Descriptive cataloge of O.R.I.M. Vol. X). This consists of three parts namely i) *Kāpālikatantra;* ii) *Rasahṛdayam;* and iiii) *Upadeśasārasarvasvasaṃgraha.* While the third is written in the *grantha* script, the other two are in a *Nandināgarī-*

both of them being popular specially in South India perhaps after 11th or 12th cent AD. This palm-leaf manuscript, being 300-400 years old, is in a damaged condition, here and there worm-eaten too. The scribe seems to be a South Indian who could have copied it from earlier sources of these parts and put them together.

Of special interest to us is the *Rasahṛdayam* which has been written on folios 10 to 38 of this compendium, along with the *Kāpālitantra* (folios 1 to 9) which also deals with some alchemical ideas and practices.

The authorship of the former is attributed to one Bhaṭṭa Govinda son of Maṇgalaviṣṇu, as stated in the colophon. However, the text ends with the statement namely, 'thus, the twentyfirst *paṭala* (chapter) of the *Rasahṛdaya* written by Shri Govinda Bhagavatpūjya pāda...., which is in conformity with that of the Ajmer text which, in addition, prefixes *'Paramahaṃsa Parivrājaka'* to the author's name.

As to the date of the text, it may be observed that in south India, specially, the cult of Śakti associated as it was with the vibrant Śavism, began to assume new dimensions from about the 4th cent. AD onwards. The Kāpālikas and the Kālamukhas who were among the different sects of this cult, were known for a wide variety of tantric rituals including the profane ceremonial orgies, even before the time of Śaṅkarācārya. It is interesting to note that, in the Karnataka region, the *Kāpālikas, Lakula Śaivas* and the *Kālamukhas* were very active and Śaṅkarācārya (8th to early 9th cent AD) established his first *pīṭha* in Sringeri in Karnataka. It is well known that he carried on a crusade against Kāpālikas and others who indulged in tantrik occult practices. That was also the period when the mercurial lore and alchemical practices had entrenched themselves among the tantriks.

The Mysore manuscript and the Ajmer text refer to one Madana (the Calcutta manuscript : Madanaratha) as the chief of *Kirātas* or a hunting community and all of three sources refer to the *Haihaya vaṃśa*, and Abhinava Someśvara (Mysore and Calcutta manuscripts) towards the end of the textual matter. In this connection, it would be of interest to note that there were Kālachuris (belonging to the Katacchhuri community of Madhya Pradesh) one family of which is stated to be of *Haihayakula* and to have migrated to Karnataka around the 10th cent A.D. Further, some of the Kalachuri chiefs had matrimonial relations with the earlier Rashtrakutas. Later, some chiefs were ruling the region near Bijapur of Karnataka, as vassals of the Chalukyas of Kalyana. Among the Chalukyan Kings, there were three Someśvaras—Someśvara I (reign

: 1044-1068 AD); Someśvara II (1068-1076); and Someśvara III (1127-1139). The last one was a scholarly king to whom is ascribed the encyclopaedic work, *Abhilaṣitārtha Cintāmaṇi* or *Mānasollāsa*. Possibily, he was the Abhinava (new) Someśvara whose scholarship enabled him to earn the title Sarvajña Chakravarti. In the *Mānasollasa* also there is a section concerned with the mercurial lore and alchemical practices. Possibly, Madanaratha could have been an adept in alchemical process which were prevalent among the Kirātas.

In the context of the foregoing, it is probable that the Rasahṛdayam might have been written by Govinda in the Karnataka region around 12th cent AD during the reign of Someśvara III.

Main characteristics of the Rasahṛdayatantra

In the first chapter, the text expatiates on the divine character of mercury and its special attributes of warding off miseries owing to poverty and diseases, of making the mortal an immortal, the importance of processes like *mūrchana* and *bandhana* for its efficacy etc. In addition, this chapter emphasises the need for a strong and healthy body, meditation and other yogic aspects to realise the four-fold human goal namely, *dharma, artha, kāma* and *mokṣa*, in which mercury has a distinct role to play. Unless one learns all about mercury, with practical knowledge by direct observation and through authoritative sources, as well as its potency for arresting old age and death, how can one experience the blissful state of Brahman? (verse 28), unlike some of the later texts, the *Rasahṛdayatantram* is not presented in the form of a dialogue between Śiva and his consort.

The Second chapter, mention the eighteen saṃskāras or methods for purification and processing of mercury and the subsequent chapters, from third to eighteenth describe, in considerable detail, the individual processes. Mica as well as sulphur and their processings have been given due importance. Similarly, the diffrent pyrites. A notable aspect of the text is its stress on various methods to be followed with diligence, specially those concerning the 'essences' or isolation of the basic part of several substances; *garbhadruti* and *bāhyadruti;* incineration resulting in the formation of *bhasmas* of the desired characteristics; the seeds or nuclei and their properties as well as their application; and the prescriptions governing the use of medicaments.

Yet another notable dimension of the text is its effective instructional approach to various substances and processes. In definitive ways, a number of verses point out the positive or negative aspects with perceptible clarity and in a coherent manner, while discussing minerals and metals, the *cāraṇa, jāraṇa,*

sāraṇa as well as the other processes. Even some proportionate quantitative compositions are presented for a considerable number of treatments. However, no correlated weights and measures seem to have been presented in the text. Conceivably, those found later in the well-known texts like the *Rasārṇava* and the *Rasaratnasamuccaya,* might have been adopted, in terms of *rati* or *guñja* (mentioned in this text), *māṣa, karṣa* or *tola, āḍhaka,* and the like.

As to the apparatus, the text describes the crucibles *(mūṣā), pātanayantras* (distillation), *dola* and *damaru yantra* (rattle shaped contrivance for distillation), *dīpikā yantra, kacchapa* (water-bath), *khalva* (pestle and mortar) and *vāluka yantra* (sand bath). The methods of fashioning some of the apparatus and their uses have been described in considerable detail.

The author of the text appears to have had sufficient knowledge of metals, alloys, minerals, their characteristics and uses in medicine. Gold, Silver, Copper, Lead, Mercury as well as iron, and alloys like brass, bronze and steel have been dealt with in the text. Among the minerals used are, cinnabar, zinc ores, arsenic sulphides, loadstone and haematite, auriferous and argentiferous pyrites, chalcopyrites, biotite, muscovite, native sulphur, stibnite, red and blue coloured secondary copper ores like coverllite, bornite, mica, and several naturally occuring salts including borax, alum etc., *Rājavarta* (Lapis Lazuli?) and coral gems have also been mentioned. Conceivably, mineralogy, in its modern sense, was little known at that time. Hence, the early users would have experienced great difficulty in the systematic identification of minerals and their standardization as well as presentation. For example, the dust of *Vajrabhūmi* i.e. Kimberlite-the mother rock of diamond is designated as *Vaikrānta,* which is actually a contoversial medicinal substance among the traditional physicians even to-day. There are some traditional *vaidyas* who think of *vikrānta* as quartz, tourmaline, feldspar or manganese ores. Likewise, there are other minerals of doubtful identification, like śilājatu (bitumen?).

In any case, the author of the *Rasahṛdyatantra,* appears to have been quite knowledgeable with regard to the deleterious or beneficial aspects of metals and minerals, as evidenced by the manner in which these have been dealt with in the text. Similar is the case in respect of a number of plants and their applications in several processes.

Perhaps, the significant merit of this text lies in its attempt at a proper blending of the twin concepts of *deha siddhi* and *loha siddhi.* While the text describes the relevant ingredients and processes for the transmutation of the base metals into gold, its approach in the 19th chapter on the *rasāyana* and its

usage is not only clear but also in the nature of a prescriptive manual in terms of the step by step treatments, use of appropriate foodstuffs including oil, fruits and milk, mercurial and other purified medicaments like the *bhasmas* and *satvas*, along with their dosages, dietary regimen etc. Like the other *rasaśāstra* texts, this text also has statements of fanciful claims. For example, certain supernatural powers have been attributed to the *Mṛtasañjīvinī gutikā* (ch. 19, vs 67-72); *Vajriṇigulikā* (73-74) and Khecharagutikā (75-76). Such claims were also a part of the tantrik *siddhi* concepts.

The Present Edition

The Sanskrit text of *Rasahṛdayam* of Govinda Bhāgavat was edited first by Jadavaji Trikumji Acharya (Āyurveda Granthamālā Series, Bombay) about seventy years ago, as recorded in some bibliographies. There are references to the *Rasahṛdayam* verses in some of texts on the *Rasaśāstra*. Attempts which were made to obtain the text edited by Jadavaji Trikumji Acharya from several libraries, did not meet with success. There is, however, another edition brought out by Krishna Gopal of Ajmer in 1958. The introduction to this work clearly refers to a text already published, without naming either its editor or the manuscript sources and states the non-availability of the latter. Understandably, this might be the text edited by Jadavji Trikumji Acharya. In any case, neither of them made any attempt to translate the text into English. Besides, as admitted by the editor of the Ajmer text, there are some lacunae with regard to the elucidation in Sanskrit of verses here and there.

Three years ago, one of the editors (BVS) came to know that there is a manuscript on the *Rasahṛdayatantram* by one Govinda Bhaṭṭa, which is associated with the *Kāpālika tantra*, in the Oriental Research Institute at Mysore, besides an incomplete manuscript available in the Asiatic Society Library at Calcutta. These have been used in the present edition.

The Ajmer text has 19 chapters called the *avabodha* (i.e. awareness) containing 498 verses. P.C. Ray in his *History of Chemistry* had pointed out that the *Rasahṛdaya* has 21 chapters called the *paṭalas*, and the incomplete manuscript at Calcutta has also the verses which, on examination, have been found to be in accord with those of the chapters 19 (partially), 20 and 21 of the Mysore manuscript.

In this edition, we have incorporated the additional chapters and verses of the Mysore manuscript into the Ajmer text, thus making the *Rasahṛdaya tantram* text complete with 21 chapters. The whole text has been rendered into English

to enable those who are not sufficiently knowledgeable in Sanskrit and the terminology of the rasaśāstra texts. Since we felt that an exact literal translation of the Sanskrit verses into English would make a cumbersome reading, besides becoming disjointed here and there on account of grammatical constraints, we have taken into consideration the contents and the context of each verse and presented their English version in a way that conveys the total meaning of the verse. Wherever necessary, some additional information or elaboration has also been included in the English version.

The text abounds in technical terms concerning minerals, metals and other substances. Not unoften, some symbolic or representative terms are employed intentionally with a view to guarding their connotation perhaps against the uninitiated and charlatans. For example, *aruṇa, arka, ravi* and *kamala* are used for denoting *tāmra* (copper); *kari phaṇi, ahi* and *nāga* (serpent) for lead; *gagana* for abhraka (mica); *bali* or *lelithaka* for *gandhaka* (sulphur) and so on. These aspects have been taken into consideration, while translating the technical terms into English. However, a considerable number of them in Sanskrit has been retained as such, transcribing them into Roman alphabets, in view of the difficulty in finding out their accurate equivalents in English. Wherever possible, specially in respect of some chemical substances including minerals, their English equivalents have been used. In any case, the reader is advised to look up the glossary and notes given in Appendix II.

It will be observed that, in this edition (i) a full texts of the *Rasahṛdayatantram,* an improvement over the Ajmer printed text, has been compiled; (ii) The hitherto unexplored manuscript in the Oriental Research Institute, Mysore, has been brought to light; (iii) The contents of the incomplete manuscript of the Asiatic Society, Calcutta have been included; (iv) Variant reading have been recorded; and (v) An English version of the text, which was not available so far, has been presented with a view to enabling those who are not conversent with Sanskrit, to have not only an insight into one of the valuable sources on Indian alchemy but also to undertake further studies on this important text.

रसहृदयतन्त्रम्

प्रथमोऽवबोधः[1]

जयति स दैन्यगदाकुलमखिलमिदं पश्यतो जगद्यस्य।
हृदयस्थैव गलित्वा जाता रसरूपिणी करुणा ॥ १ ॥

पीताम्बरोऽथ बलिजिन्नागक्षयबहलरागगरुडचरः।
जयति स हरिरिव हरजो विदलितभवदैन्यदुःखभरः॥ २ ॥

मूर्च्छित्वा हरति रुजं बन्धनमनुभूय मुक्तिदो भवति।
अमरीकरोति सुमृतः कोऽन्यः करुणापरस्तस्मात् ॥ ३ ॥

सुरगुरुगोद्विजहिंसापापकलापोद्भवं किलासाध्यम्।
तदपि च शमयति यस्मात्कोऽन्यस्तस्मात्पवित्रतरः॥ ४ ॥

तस्य स्वयं हि स्फुरति प्रादुर्भावस्स शाङ्करः कोऽपि।
कथमन्यथा हि शमयति विलसन्मात्राच्च पापरुजम्॥५ ॥

रसबन्धश्च स धन्यः प्रारम्भे यस्य सततमिव करुणा।
सिद्धे रसे करिष्ये महीमहं निर्जरामरणम्॥ ६ ॥

ये चात्यक्तशरीरा हरगौरीसृष्टिजां तनुं प्राप्ताः।
वन्द्यास्ते रससिद्धा मन्त्रगणाः किङ्करा येषाम्॥ ७ ॥

सुकृतफलं तावदिदं सुकुले यज्जन्म धीः स्वतन्त्रापि।
सापि च सकलमहीतलतुलनफला भूतलं च सुविधेयम्॥ ८ ॥

---

१ कृष्णगोपाल आयुर्वेद भवन, पो. कालेड़ा-कृष्णगोपाल (अजमेर) इति संस्थया १९५८ तमे ख्रिस्तसंवत्सरे प्रकाशित : ग्रन्थ : अत्र मूलग्रन्थरूपेण स्वीकृतोऽस्ति।

भूतलविधेयतायाः फलमर्थास्ते च विविधभोगफलाः।
भोगास्सन्ति शरीरे तदनित्यमहो वृथा सकलम्।। ९ ।।

इति धनशरीरभोगान् मत्वानित्यान्सदैव यतनीयम्।
मुक्तिस्तस्य ज्ञानात्तच्चाभ्यासात्स च स्थिरे देहे।। १ ० ।।

तत्स्थैर्येण समर्थं रसायनं किमपि सूतलोहादि।
स्वयमास्थिरस्वभावं दाह्यं क्लेद्यं च शोष्यं च।। १ १ ।।

काष्ठौषध्यो नागे नागं वङ्गेऽथ वङ्गमपि शुलबे।
शुल्बं तारे तारं कनके कनकं च लीयते सूते।। १ २ ।।

परमात्मनीव नियतं भवति लयो यत्र सर्वसत्त्वानाम्।
एकोऽसौ रससराजश्शरीरमजरामरं कुरुते।। १ ३ ।।

अमृतत्वं हि भजन्ते हरमूर्तौ योगिनो यथा लीनाः।
तद्वत्कवलितगगने रससराजे हेमलोहाद्याः ।।१ ४ ।।

स्थिरदेहोऽभ्यासवशात्प्राप्य ज्ञानं गुणाष्टकोपेतम्।
प्राप्नोति ब्रह्मपदं पुनर्भवावास दुःखे न ।। १ ५ ।।

एकांशेन जगन्ति च विष्टभ्यावस्थितं परं ज्योतिः।
पादैः[1] स्त्रिभिस्तदमृतं सुलभं न विरक्तिमात्रेण[2]।। १ ६ ।।

---

१ प्राच्यविद्यासंशोधनालयः, मैसूरु इति संस्थायाः हस्तप्रतिग्रन्थालये ३००५/२ इति संख्यान्वितः रसहृदयाख्यो ग्रन्थः "त्रिभिस्तदमृतं....." इत्यतः उत्तरम् उपलभ्यते। पाठन्तरसंशोधनार्थम् अयं ग्रन्थः अस्माभिः स्वीकृतोऽस्ति। अत एव सर्वत्र पाठान्तरप्रदर्शने अमुद्रितः मैसूरु ग्रन्थः एव ग्राह्यः सूचनान्ताराभावे। २ विरक्तिमार्गेण।

न हि देहेन कथञ्चिद् व्याधिजरामरणदुः खविधुरेण।
क्षणभङ्गुरेण सूक्ष्मं तद्ब्रह्मोपासितुं शक्यम् ॥१७॥

नामापि देह[1] सिद्धेः को गृह्णीयाद्विना शरीरेण।
यद्योगगम्यममलं मनसोऽपि न गोचरं तत्त्वम् ॥१८॥

यज्ञाद्दानात्तपसो वेदाध्ययनाद्दमात्सदाचारात्।
अत्यन्तं श्रेय[2]: किल योगवशादात्मसंविदितिः ॥१९॥

गलितानल्प[3] विकल्पस्सर्वार्थविवर्जितश्चिदानन्दः।
स्फुरितोऽप्यस्फुरिततनोः करोति किं जन्तुवर्गस्य ॥२०॥

भ्रूयुगमध्यगतं यच्छिखिविद्युन्निर्मलं जगद्भासि।
केषाञ्चित्पुण्यकृता[4] मुन्मीलति चिन्मयं ज्योतिः ॥२१॥

परमानन्दैकमयं परमं ज्योतिस्स्वभावमविकल्पम्।
विगलितसर्वक्लेशं ज्ञेयं शान्तं स्वयंवेद्यम्॥२२॥

तस्मिन्नाधाय मनस्स्फुरदखिलं चिन्मयं जगत्पश्यन्।
उत्सन्नकर्मबन्धो ब्रह्मत्वमिहैव चाप्नोति ॥२३॥

अस्तं हि यान्ति विषयाः प्राणान्तः करणसंयोगात्[5]।
स्फुरणं नेन्द्रियतमसां नातस्स्फुरतश्च दुः खसुखे ॥२४॥

---

१ योगसिद्धेः। २ भूयसी। विशेषसूचनाः मैसूरु तालपत्रं नन्दिनागरीलिप्यां लिखितमस्ति। तथा च बहुत्र जीर्णमप्यस्ति। अस्माभिश्च यावच्छक्ति प्रयत्नो विहितः शुद्धं पाठम् अन्वेष्टुम्। तथापि कवचित, अनिवार्यतया पाठदोषाः अवशिष्टाः। ते यथावदत्र निर्दिष्टाः। असति अर्थान्तरग्रहणे 'च-तु' प्रभृतयो पाठभेदाः न परिगणिताः। ३ नेक....। ४.....पुण्यमदशाम्। ५ .....करणसंश्रयं यान्ति।

रागद्वेषविमुक्तास्सत्याचारा नरा मृषारहिताः।
सर्वत्र निर्विशेषा भवन्ति चिद्ब्रह्मसंस्पर्शात् ॥ २५ ॥

तिष्ठन्त्यणिमादियुता विल[1]सद्देहा मुदा सदानन्दाः।
ये ब्रह्मभाव[2]ममृतं संप्राप्तश्चैव कृतकृत्याः ॥ २६ ॥

आयतनं विद्यानां मूलं धर्मार्थकाममोक्षाणाम्।
श्रेयः परं किमन्यच्छरीरमजरामरं विहायैकम् ॥ २७ ॥

प्रमाणतोऽपि प्रत्यक्षाद्यो[3] न जानाति सूतकम्।
अनादिविग्रहं देवं कथं ज्ञास्यति चिन्मयम् ॥ २८ ॥

यज्जरया जर्जरितं कासश्वासादिदुःखवशमाप्तम्।
योग्यं तन्न समाधौ प्रतिहत बुद्धीन्द्रियप्रसरम् ॥ २९ ॥

बालः षोडशवर्षो विषयरसास्वादलम्पटः परतः।
जातविवेको वृद्धो मर्त्य कथमाप्नुयान्मुक्तिम् ॥ ३० ॥

अस्मिन्नेव शरीरे येषां परमात्मनो न संवेदः।
देहत्यागदूर्ध्वं तेषां तद्ब्रह्म[4] दूरतरम् ॥ ३१ ॥

ब्रह्मादयो यजन्ते यस्मिन् दिव्यां तनुं समाश्रित्य।
जीवन्मुक्ताश्चान्ये कल्पान्तस्थायिनो मुनयः ॥ ३२ ॥

---

१ विकसद्....। २ ब्रह्मस्वभावम्.....। ३ प्रत्यक्षेण प्रमाणेन यो.....। ४ तद्ब्रह्म भवति दूरतरम्।

तस्माज्जीवन्मुक्तिं समीहमानेन योगिना प्रथमम्।
दिव्या तनुर्विधेया हरगौरीसृष्टि संयोगात् ॥ ३ ३ ॥

तस्यापि साधनविधौ सुधिया प्रतिकर्मनिर्मलाः प्रथमम्।
अष्टादश संस्कारा विज्ञातव्याः[1] प्रयत्नेन ॥ ३ ४ ॥

इति परमहंसपरिव्राजकाचार्य श्रीमद्गोविन्दभगवत्पादविरचिते
रसहृदयतन्त्रे रसप्रशंसात्मकः प्रथमोऽवबोधः।[2]

द्वितीयोऽवबोधः

स्वेदनमर्दनमूर्च्छोत्थापन पातननिरोधनियमाश्च।
दीपनगगनग्रासप्रमाणमथ चारणविधानं च ॥ १ ॥

गर्भद्रुतिबाह्यद्रुतिजारण[3] रसरागसारणं चैव[4]।
क्रामण वेधौ भक्षणमष्टादशधेति रसकर्म ॥ २ ॥

आसुरिपटुकटुकत्रयचित्रार्द्रकमूलकैः कलांशैश्च।
सूतस्य काञ्जिकेन त्रिदिनं मृदुवह्निना स्वेदः[5] ॥ ३ ॥

([6]अष्टाङ्गुलविस्तारं दैर्घ्येण दशाङ्गुलं त्वथो भाव्यम्।
रन्ध्रं कण्ठादधः समुच्छ्रितचतुरङ्गुलं कृतजलाधारम्।

---

१ स्वरं प्रयत्नेन। २ इति श्रीमद्गोविन्दभगवत्पादपूज्यविरचिते रसहृदये प्रथमः उपोद्घातः पटलः। मैसूरुपुस्तके अवबोध इत्यत्र पटलशब्दः प्रयुक्तः इति विशेषः। ३ जारणम्। ४ सरागसारणाचैव। ५ स्वेदम्। इति स्वेदनम्। ६ अस्मात् श्लोकात् आरभ्य 'गुडदग्धोर्णा' इति पर्यन्तम् अष्टौ श्लोकाः मैसूरुग्रन्थे अधिकतया उपलभ्यन्ते। अतोऽत्र ( ) चिह्नेन सूचितम्। एवमन्यत्रापि।

अन्तः प्रविष्टतलभाण्डवदन जलमग्ने निजमुख प्रान्ताम्।
उपरिष्टाच्चिपिटघटी देयोदरघोडशाङ्गुलविशाला।

तस्मिन्नधोर्ध्वभाण्डे निपातितस्सकलदोषनिर्मुक्तः।
सुतरां भवति रसेन्द्रो ग्रासाज्जीर्णोऽपि पात्योऽसौ।

कृत्वा च नष्टपिष्टीं त्रिफला शिखिरायुराजिकापटुभिः।
संलेप्य चोर्ध्वभाण्डे दीप्तैरुपलैरधः पात्यम्।

इत्यधः पातनम्।

कच्छपयन्त्रान्तर्गतमृण्मयपीठस्थदीपिकासंस्थः।
यस्मिन्निपतति सूतं तत्प्रोक्तं दीपिकायन्त्रम्।

अथवा दीपकयन्त्रे निपातितस्सकलदोषनिर्मुक्तः।
तिर्यक्पातनविधिना निपातितस्सूतराजस्तु।

श्लक्ष्णीकृतमभ्रदलं रसेन्द्रयुक्तं तथारनालेन।
खल्वे कृत्वा मृदितं यावत्तन्नष्टपिष्टितामेति।

कृत्वा तिर्यक्पातनपातितसूतः क्रमेण दृढमग्नौ।

इति तिर्यक्पातनम्।)[१]

गुडदग्धोर्णालवणैर्मन्दिरधूमेष्टकासुरीसहितैः।
रसषोडशांशमानैस्सकाञ्जिकैर्मर्दनं त्रिदिनम्॥ ४॥

---

१ मैसूरु ग्रन्थे श्लोकसंख्या न निर्दिष्टा। अतोऽस्माभिः नूतनसंख्यानिर्देशः न कृतः। अजमेरग्रन्थस्य संख्याक्रमः सर्वत्र रक्षितः। श्लोकानुक्रमणिकायां तु भर्वे श्लोकाः अन्तर्भाविता एव।

मलशिखिविषाभिधाना रसस्य नैसर्गिकास्त्रयो दोषाः।
मूर्च्छां मलेन कुरुते शिखिना दाहं विषेण मृत्युं च ॥५॥

गृहकन्या हरति मलं त्रिफलाग्निं चित्रकश्च विषम्।
तस्मादेभिर्मिश्रैर्वारान् संमूर्च्छयेत् सप्त ॥ ६ ॥

अमुना विरेचनेन हि सुविशुद्धो नागवङ्ग परिमुक्तः।
सूतः पातनयन्त्रे समुत्थितः काञ्जिकक्वाथात् ॥ ७ ॥

कृत्वा तु शुल्बपिष्टिं निपात्यते नागवङ्गशङ्खातः।
तस्मिन् दोषान् मुक्त्वा निपतति शुद्धस्तथा सूतः ॥ ८ ॥

मर्दनमूर्च्छनपातैः कदर्थितो भवति[1] मन्दवीर्यात्वात्[2]।
सृष्ट्यम्बुजैर्निरोधाल्लब्धाप्यायो न षण्ढः स्यात् ॥ ९ ॥

इति लब्धवीर्यस्सम्यक् चपलोऽसौ संनियम्यते तदनु।
फणिलशुनाम्बु जमार्कवकर्कोटी चिञ्चिका स्वेदात्[3] ॥ १० ॥

([4]निरोधन नियमस्वेदादूर्ध्वं द्रव्येण संयुतं कृत्वा।
भण्डीकान्तःस्थापितकाञ्जिकयुक्तोऽग्निना स्वेद्यम्।)

भूखग टङ्गणमरिचैर्लवणासुरिशिग्रुकाञ्जिकैस्त्रिदिनम्।
स्वेदेन दीपितोऽसौ ग्रासार्थी जायते सूत[5]: ॥ ११ ॥

---

१ भजति। २ मन्दवीर्यत्वम्। ३ प्रायोलब्धवान....। ४ फणिनयनाङ्गमाकलककर्कोदीपितो स्वेदात्। इति नियमनम्। ५ मैसूरुग्रन्थे अयमधिकरूपेणोपलभ्यते। ६ इति दीपनम्।

इति दीपितो विशुद्धः प्रचलित विद्युल्लतासहस्राभः।
भवति यदा रससराजश्रार्यो दत्वा द्वितीयमिदम्[1] ॥ १ २ ॥

पीत क्रियासु पीतं श्वेतं तारक्रियासु मुखमादौ।
देयं खल्वे घृष्टो दिव्यौषधिभिस्स[2] निर्मुखश्चरति[3] ॥ १ ३ ॥

इति परमहंस परिव्राजकाचार्य श्रीमद्गोविन्दभगवत्पादविरचिते
रसहृदयतन्त्रे रसशोधनात्मको द्वितीयोऽवबोधः।[4]

तृतीयोऽवबोध :[5]

घनरहितबीजचारणसंप्राप्तदलादिद्रव्यकृतकृत्या।
कृपणाः प्राप्य समुद्रं वराटिकालाभसन्तुष्टाः ॥ १ ॥

अन्ये पुनर्महान्तो लक्ष्मीकरिराजकौस्तुभादीनि।
अवधीर्य लब्धवन्तः परामृतं चामरा जाताः ॥ २ ॥

क्षारौषधिपद्धम्लैः क्षुद्धोधो रागबन्धने रचेदात्।
न पुनः पक्षछेदो[6] द्रव्यत्वं वा विना गगनम् ॥ ३ ॥

अभ्रकजीर्णो बलवान् भवति रसस्तस्य चारणे प्रोक्ताः।
सन्धानवासनौषधिनिर्मुखसमुखा महायोगाः ॥ ४ ॥

निश्चन्द्रिकं हि गगनं क्षाराम्लैर्भावितं तथा रुचिरैः[7]।
सृष्टित्रयनीरकणात्तुम्बुरुरसमर्दितं चरति ॥ ५ ॥

---

१ सुबीजमिदम्। २ दिव्यौषधास्स। ३ इति निर्मुखचारणा। ४ इति रसहृदये शोधनाधिकारो द्वितीयः पटकः। ५ अथ पत्राभ्रकजारणा। ६ पक्षच्छेदी। ७ रुधिरम्।

यवचिं[1] श्चिकाम्बुपुटितं [2]तन्मूलशतावरीगदा[3] कुलितम्।
घनरवशिग्रुपुनर्नवारसभावितमभ्रकं चरति ॥ ६ ॥[4]

सर्जीक्षितिखगटङ्कणलवणान्वितमर्कभाजने त्रिदिनम्।
पर्युषितमारनालं गगनादिक[5] जारणे शस्तम्॥ ७ ॥

तस्मिन्नागं शुद्धं प्रद्राव्य निषेचयेच्छतं वारान्।
वङ्गं वा तारविधौ रसायने नैव तद्योज्यम् ॥ ८ ॥

गगनरसोपरसामृतलोह[6] रसायसादिचूर्णानि।
सर्वमनेन हि भाव्यं यत्किञ्चिच्चारणावस्तु ॥ ९ ॥

आदौ खल्वें मृदितां पिष्टीं हेम्नश्च[7] तां रसश्चरति।
तारस्य तारकर्मणि दत्वा सूते ततो गगनम् ॥ १० ॥

त्रुटिशो दत्वा मृदितं सारे[8] खल्वेऽ[9]भ्रहेमलोहादि।
चरति रसेन्द्रः क्षिति[10]खगवेतसबीजपूराम्लैः ॥ ११ ॥

समुखं निर्मुखमथवा तुल्यं द्विगुणं चतुर्गुणं वापि।
[11]अष्टगुणं षोडशगुणमथवा द्वात्रिंशता गुणितम् ॥ १२ ॥

इति पत्राभ्रकमुक्तं तेन विधाजने [12]चारयेत् सुतम्।
ग्रासः पिष्टी गर्भस्त्रिलक्षणा[13] चारणा भवति ॥ १३ ॥

---

१ पि कोत्थ.....। २ तमाल.....। ३.....कदली। ४ इति निर्मुखचारणा। ५ गगनादिषु भावने.....। ६ रसाश्रादि.....। ७ हेम्नस्तु स गलति। ८ सोष्णे.....। ९ च हेम.....। १०....धनवेतसजम्बीरबीज.....। ११ श्लोकार्धोऽयं मैसूरुग्रन्थे नारित। १२ रञ्जयेत्.....। १३.....लक्षणगगजचारणं.....।

दोलनविधिना यैरपि नानाविधभङ्ग [१]संस्कृतं गगनम्।
[२]मारणविधिनोद्दिष्टं [३]पिष्टं [४]यानल्पमानैस्तै : ॥ १ ४ ॥

अन्येऽपि [५]तुच्छमतयो गन्धकनिष्पिष्टिशुल्बपिष्टिरजः।
दोलनविधिनोद्भूतं रसजीर्णं तदिति मन्यन्ते ॥ १ ५ ॥

तैलादिकतप्तरसे हाटकतारादिगोलकमुखेन।
चरति घनं रसराजो हेमादिभिरेति पिण्डत्वम् ॥ १ ६ ॥

अन्ये स्वच्छं कृत्वा शुकपिच्छमुखेन [६]चारयन्ति घनम्।
[७]सिद्धोपदेशविधिना [८]अशितग्रासे न शुष्केण ॥ १ ७ ॥

अथवा माक्षिकगगनं [९]समभागं पटुयुतं पक्वम्।
प्रक्षिप्य लोहपात्रे स्वेदान्तश्चरति कृष्णाभ्रम् ॥ १ ८ ॥

तं प्रवक्ष्याम्युपदेशं गन्धाभ्रकसंप्रवेशनं येन।
पक्षच्छिन्नश्च रसो योग्यः स्याद्रसरसायनयोः ॥ १ ९ ॥

रसराजरागदायी बीजानां पाकजारणासमर्थः।
सूतकपक्षच्छेदी रसबन्धे गन्धकोऽभिहित : ॥ २ ० ॥

दत्वा खल्वे त्रुटिशो गन्धकमादौ रसं च त्रुटिशोऽपि।
तावच्च मर्दनीयं [१०]यावत्सा पिष्टिका भवति ॥ २ १ ॥

---

१ सम्भूतम्। २ चारण....। ३ दृष्टं पिष्टं.....। ४ दोधूयमानं तैः। ५ शुद्ध....। ६ वारयन्ति। ७ शुद्धो.....। ८ प्रयति शुष्केण। ९ समभागपुटितपटुयुक्तम्। १० यावच्च तत्....।

[१]तदनु च द्रुतबलिवसया समभागनियोजितं तथा गगनम्।
त्रुटिशो रसं च दत्वा कुर्वीत यथेप्सितां पिष्टिम् ॥ २२ ॥

सापि च दीप्तैकपलैर्निपात्यतेऽधोऽथ दीपिकायन्त्रे।
तदनु च निर्मुक्तमलो निकृन्तपक्षोऽभ्रगन्धाभ्याम् ॥ २३ ॥

भस्माकारश्च रसो हेम्ना सह युज्यते स च द्वन्द्वे।
अथवा गन्धकपिष्टिं पक्त्वा द्रुतगन्धकस्य मध्येतु ॥ २४ ॥

सा चापि [२]हेमपिष्टिर्विपच्यते गन्धके भूयः।
इत्थं हेम्ना सूतो मिलति द्वन्द्वे [३]तथा क्षणान्म्रियते ॥ २५ ॥
([४]आ श्लो च रसे जासे संकोचितो ज्ञेयः।)

[५]इतरे पक्षच्छेदं[६] द्वन्द्वे रसमारणं ज वाञ्छन्ति।
बीजानामपि पाकं हृष्यन्ति च तदनु तप्यन्ति ॥ २६ ॥

इत्थमनेकैर्दोषै[७]र्बहुश्रमैर्गगनचारणं मत्वा।
निर्दिश्यते प्रकारः कर्मणि शा[८]स्त्रोऽपि संवादी ॥ २७ ॥

अग्राह्यो निर्लेपः सूक्ष्मगतिर्व्यापकोऽक्षयो जीव[९]ः।
यावद्विशति न योनौ तावद्बन्धं कुतो भजते ॥ २८ ॥

[१०]इति परमहंसपरिव्राजकाचार्य श्रीमद्गोविन्दभगवत्पादविरचिते रसहृदयतन्त्रे निर्मुखवासनामुखान्तर्भूतसमुखपत्रार्भक चारणात्मक स्तृतीयोऽवबोधः।

---

१ अथ तत्.....। २ हेम पिष्ट्या संयोज्य विपच्यते भूयः। ३ यथा। ४ ( ) अधिकः पाठः। ५ इति ये.....। ६ ...छेदात् द्वन्द्वं.....। ७ विषं खलं गगन....। ८ शास्त्रेषु। ९ हीनः। १० इति गोविन्दभगवत्पूज्यपाद विरचिते रसहृदये पत्रार्भकजारणाधिकारो नाम तृतीय : पटलः।

चतुर्थोऽवबोधः[1]

कृष्णो रक्तः पीतो [2]ध्मातोऽपि स्थूलतारकारहितः।
वज्री स पीत[3] कर्मणि पातितसत्त्वो घनो योज्यः ॥ १ ॥

निश्चन्द्रिकं हि गगनं वासितमपि वासनाभिरिह शतधा।
तदपि न चरति रसेन्द्रः [4]सत्त्वं कथमत्र यत्नतः प्रभवेत् ॥ २ ॥

मुक्त्वैकमभ्रसत्त्वं नान्यः पक्षा[5]पकर्तनसमर्थः।
तेन [6]निरुद्धप्रसरो नियम्य ते बध्यते च [7]सुखम् ॥ ३ ॥

पक्षच्छेदमकृत्वा रसबन्धं कर्तुमीहते यस्तु।
बीजैरेव हि स जडो वाञ्छत्यजितेन्द्रियो मोक्षम् ॥ ४ ॥

नाधः पतति न चोर्ध्वं तिष्ठति यन्त्रे भवेदनुद्धारी।
अभ्रकजीर्णस्सूतः पक्षच्छिन्नस्स विज्ञेयः ॥ ५ ॥

([8]रक्तं पीतं कृष्णं शस्तं हेम्नि क्रियासु किल गगनम्।
तारक्रियासु शुक्लं रसायने सर्वमेवेष्टः ॥)

श्वेतादिचतुर्वर्णाः कथितास्ते [9]स्थूलतारकारहिताः।
[10]वज्री सत्त्वं मुञ्चत्यपरे ध्माताश्च काचतां यान्ति ॥ ६ ॥

[11]सितरक्ता सितपीता[12] ये केचिदुदाहृता घना[13] लोके
[14]अल्पबला निःसत्त्वा वज्री श्रेष्ठस्तु सर्वेषाम् ॥ ७ ॥

---

१ अभ्रकसत्त्वचारणा। २ योऽभ्रस्य...। ३ पीतककर्मणि। ४ सत्त्वैकरता गतप्रभवम्। ५ पक्षरसकर्तन.....। ६ निबद्ध....। ७ मुखम्। ८ मैसूरु ग्रन्थस्थः अधिकः श्लोकः अयम्। ९ पक्वतारका.....। १० अयं श्लोकार्धः अग्निमश्लोकस्य पूर्वार्धः। अग्निमश्लोकस्य पूर्वार्धस्तु श्लोकस्यास्य उत्तरार्धः मैसूरुग्रन्थे। ११ 'सित' शब्दः लुप्तः। १२ पीतायाः। १३ 'घना' शब्दः लुप्तः १४ अल्पा च लाल्यसत्त्वा। १५ श्रेष्ठा च।

सूतेऽपि रसायनिनां योज्यं परिकीर्तितं परं सत्त्वम्।
त्रिविधं गगनमभक्ष्यं काचं किट्टंच पत्ररजः ॥ ८ ॥

मुञ्चति सत्त्वं ध्मातस्तृणसारविकारकैर्धनः स्विन्नः।
परिहृत्य काचकिट्टं ग्राह्यं सारं प्रयत्नेन ॥ ९ ॥

स्वेद्यो बद्ध्वा पिण्डं माहिषदधिदुग्धमूत्रशकृदाज्यैः।
अथ पञ्चगव्ययुक्तः सत्त्वं पातयति लोहनिभम् ॥ १० ॥

सूर्यातपपीतरसाः स्वल्पं मुञ्चन्ति धातवः सत्त्वम्।
स्वस्थानस्थास्सन्तो मुञ्चन्ति त एव भूयिष्ठम् ॥ ११ ॥

बहुगम्भीरं ध्मातो वर्षति मेघस्सुवर्णधाराभिः।
देवमुखतुल्यममलं पतितं सत्त्वं तथा विन्द्यात् ॥ १२ ॥

यदि लोह[9]निभं पतितं जातं गगनस्य तद्रसश्चरति।
मिलति च सर्वद्वन्द्वे[10] ह्यौषधिभिश्चरति विनापि मुखैः ॥ १३ ॥

माक्षिकसहितं गगनं ध्मातं सत्त्वं मुख[12]प्रदं भवति।
तदनुच नागैर्वङ्गैस्सहितं च सुखप्रदं सत्त्वम् ॥ १४ ॥

माक्षिक[11]सत्त्वे योगाद् घनसत्त्वं चरति सूतको नि[13]खिलम्।
नि[14]यतं गर्भद्रावी स रज्यते बध्यते चैवम् ॥ १५ ॥

---

१ अपि शब्दः लुप्तः। २ रसायनिना भक्ष्यम्....। ३ तथा...। ४ दुग्धशब्दः लुप्तः। ५ शकृद्भिरपि। ६ युक्तं तत्। ७ पतति लोहानिभे। ८ अस्य श्लोकार्ध स्थाने "बहलं विमलं च तथा यथा तथा दूरभूमिगताः।" इति पाठः विद्यते। ९ लोहत्वं निपतति.....। १० द्वन्द्वनोषधि...। ११ माक्षिकत्वं गगनं....। १२ सुखप्रदं.....। १३ निखिलशब्दः लुप्तः १४ नियतमित्यत्र निखिलमित्यस्ति।

सत्वं घनस्य कां[1]नं तालकयुक्तं सुरन्धितं ध्मातम्।
वारैस्त्रिभिरिह सत्वं भक्ति र[2]सेन्द्रबन्धकारि प[3]रम् ॥१६॥

लोहं चाभ्रकसत्वं तालकसमभागसारितं चरति।
अभिषवयोगाच्चाङ्गुलिमृदितं गर्भे च तद् द्रवति ॥१७॥

वङ्गमथो घनसत्वं तालकषड्भागसारितं चरति।
अभिषवयोगाच्चरति व्रजति रसो नात्र सन्देहः ॥१८॥

बहलं सुवर्णवर्णं निचुलपुटैः प[4]तति पञ्चभिस्सत्वम्।
वटकीकृत[5]मृतगगनं निरञ्जनं किट्टरहितंच ॥१९॥

तच्चूर्णीकृत्य ततः क्षाराम्लैर्भावितं घ[6]नं बहुशः।
सृष्टिन्नयनीरकणात्म्बुकरसमर्दितं चरति ॥२०॥

घनसत्वशुल्बमाक्षिकसमभागनियोजितं तथा मिलितम्।
तच्छुल्बाभ्रं कथितं चरति रसो जीर्यति क्षिप्रम् ॥२१॥

इति ताप्यशुल्बसहितं घनसत्वं लोह[7]खल्वके मृदितम्।
चरति रसेन्द्रः काञ्जिक वेतसज[8]म्बीरबीजपूराम्लैः ॥२२॥

इति तीक्ष्णशुल्बनागं माक्षिकयुक्तं चे तत्कृतं खोटम्।
तद्भस्म च[9]° पुटविधिना निर्व्यूढं सत्वरञ्[10]कं भवति ॥२३॥

---

१ कांक्षी....। २ रसे बन्ध....। ३ चिरम्। ४ पतेत्....। ५ कृतमभ्रगगनं....। ६ अयं शब्दः लुप्तः। ७ सोष्णखल्वके....। ८ जम्बीरयोगेन। ९ समेन कृतखोटम्। १० कृतविदधानां.....। ११ रञ्जनं....।

चार्यं यत्नेन रसे घनसत्वं तं[1] द्विधं घनं तस्य।
[2]संयोज्य सर्वबीजं निर्वाह्यं द्वन्द्वसङ्करत : ॥ २४ ॥

अभ्रकचारणमादौ गर्भद्रुतिचारणं हेम्नोऽन्ते।
यो जानाति न वादी वृथैव सोऽर्थक्षयं कुरुते ॥ २५ ॥

गगनग्रासरहस्यं वक्ष्याम्येकं घनार्कसंयोगात्।
केवलमभ्रकसत्वं ग्रसते यत्नान्न[3] सर्वाङ्गम् ॥ २६ ॥

([4]कमलघानमाक्षिकाणां चूर्णं समभागयोजितं मिलितम्।
तच्छुल्बाभ्रं शीघ्रं चरति रसो द्रवति गर्भेच ॥

अथनागाभ्रचार्यं वङ्गाभ्रं माक्षिकाभ्रं वा।
कमलाभ्रं वा चार्यं हेमाभ्रं वापि रससराजे[5]॥)

[6]इति परमहंसपरिव्राजकाचार्य श्रीमद्गोविन्दभगवत्पादविरचिते
रसहृदयतन्त्रे सत्वभ्रकचारणात्मकश्चतुर्थोऽवबोधः।

पञ्चमोऽवबोध :[6]

यदि घनसत्वं गर्भे न [8]पतति नोवा [9]द्रवन्ति बीजानि।
न च बाह्यद्रुतियोगस्तत्कथमिह बध्यते सूतः ॥ १ ॥

गर्भद्रुत्या रहितो ग्रासश्चीर्णोऽपि नैकतां याति।
[2]एकीभावेन विना न जीर्यते तेन सा कार्या ॥ २ ॥

---

१ तद्विद्धि वन्धनं तस्य। २ योज्यं च सर्वबीजे....। ३ यस्मात्र....। ४ ( ) अयं भागः अजमेरग्रन्थे न दृइते। ५ रसचारणाधिकारश्चतुर्थः। ६ इदं सर्वं नास्ति। ७ इदमपि नास्ति। ८ चरति। ९ नैव द्रवान्ति....।

बीजानां संस्कारः कर्तव्यः कोऽपि तादृशः प्रथमम्।
येन द्रवन्ति गर्भे रसराजस्याम्लवर्गेण ॥ ३ ॥

सममाक्षिककृतवापं सममाक्षिकसत्त्वसंयुतं हेम।
गर्भे द्रवति च जरति च जरितं बध्नाति नान्यथा सूतम् ॥ ४ ॥

माक्षिकसत्त्वं हेम्ना पादादिकजारितं द्रुतं [9]सूते।
तारारिष्टं कुरुते वरकनकं पत्रलेपेन ॥ ५ ॥

समरसतां यदि यातो[6] वस्त्राद्गलितोऽधिकश्च तुलनायाम्[7]।
ग्रासो द्रुतस्य गर्भे द्रुत्वासौ[8] जीर्यते क्षिप्रम् ॥ ६ ॥

न बिडैर्नापि क्षारैर्न स्नेहैर्द्रवति[5] हैम तारं वा।
माक्षिकसत्त्वेन विना त्रिदिनं निहितेन रक्तेन ॥ ७ ॥

लवणं देवीस्वरसप्लुतमहिपत्रं विचूर्णितं शिलया।
एतत्पुटनत्रितयात्सुमृतं संस्थापयेदयः पात्रे ॥ ८ ॥

विहितार्धाङ्गुलनिम्ना स्फुट विकटकटोरिका मुखाधारा।
तस्योपर्यादेया कटोरिका चाङ्गुलोत्सेधा ॥ ९ ॥

विहितच्छिद्रत्रितया शस्ता चतुरङ्गुलोर्ध्वच्छिद्रेषु।
लोह[9] शलाका योज्यास्तत्रापि च हेमपत्राणि ॥ १० ॥

---

१ ग्रासाज्जीर्णो....। २ एकीभावमृतेन.....। ३ रसराजस्सूक्ष्मयोगेन। ४ हेम्ना।५ मृतं.....। ६ याते.....। ७ तुल्यायाः। ८ द्रुत्वेनासौ.....। ९ स्वेदैश्चरति.....।१० मृदुनाभिहितेन रक्तसत्त्वेन। ११ पुटपाकत्रितया.....।

[२]संस्थाप्य विधूप्यन्ते यन्त्राधस्तात् प्रदीपयेदग्निम्।
धूमोपलेपमात्राद्भवन्ति कृष्णानि हेमपत्राणि ॥ ११ ॥

तान्यग्नितापितानि च पश्चाद्यन्त्रे मृतानि धूमेन।
पाचितहेम[३] विधानाज्जरति रसेन्द्रो द्रवति गर्भे च ॥ १२ ॥

तेनैव तारपत्रं विधिना संस्वेद्य यन्त्र योगेन।
[४]जायेत कृष्णवर्णं तत्तारं द्रवति गर्भे च ॥ १३ ॥

अथवा बलिना वङ्गं नागाभिधानेन यन्त्रयोगेन।
हेमार्द्धं[५] तारं वा द्रवति च गर्भे न सन्देहः ॥ १४ ॥

([६]माक्षिकशुद्धचूर्णं पारदसहितेन यन्त्रविधेयोगेन।
पक्वं चन्द्रसाञ्जनचित्रं भाण्डे पतति गर्भे च ॥)

रसकं बलिना युक्तं पूर्वोक्त[७]विधानयोगेन।
पक्वं चूर्णं यावद्भवति भृशं द्रवति गर्भे च ॥ १५ ॥

([८]शुद्धं माक्षिकसत्त्वं निर्व्यूढं चतुर्गुणं हेम्नि।
तद्धत् द्रवति रसेन्द्रो बमति च गर्भे रसस्य तुलयांशे।
निर्व्यूढमथ गन्धकाश्मा शतगुणसंख्या तथोत्तमे हेम्नि॥)

[१]व्यूढोऽथ गन्धकाश्मा शतगुणसंख्ये तथोत्तमे हेम्नि।
सूते च भवति पिष्टिर्द्रवति हि गर्भे ने विस्मयः कार्यः ॥ १६ ॥

---

१ खलु शिलाभा योज्या....। २ इदं पद्यं मैसूरुपुस्तके नास्ति। ३ हेम्ना विधिना चरति रसो....। ४ प्राप्नोति.....। ५ स्वर्णं वा.....। ६ अधिकः पाठः। ७ पूर्वोक्तेन यन्त्रयोगेन। ८ अधिकः पाठः।

अथवा शतनिर्व्यूढं रसकवरं शुद्धहेम्नि वरबीजम्[2]।
बीजं जरति रसेन्द्रे[4] द्रवति च गर्भे न सन्देहः ॥१७॥

अथवा तालकसत्त्वं[5] शिलया[6] वा तच्च हेम्नि निर्व्यूढम्।
[7]शतगुणमथ मूषायां जरति रसेन्द्रो द्रवति गर्भे च ॥१८॥

([8]तत्समसूते पिष्टिर्भवति च गर्भे द्रुतिः शीघ्रम्।
अथवा तालकसत्त्वं कुनटीसत्त्वं च हेम्नि निर्व्यूढम्।
शतगुणमथ मूषायां जरति रसो द्रवति गर्भे च॥)

रसदरदाभ्रकताप्य विमलामृतशुल्ब लोह पर्पटिका।
स्नुह्यर्कदुग्धपिष्टं कङ्कुष्ठशिलायुतं नागम् ॥१९॥

अभ्रकतालकशङ्खरससहितं तत्पुनः पुनः पुटितम्।
